काण्डरुहा, स्त्री, (काण्डात् छिन्नस्कन्धात् रोहतीति। काण्ड + रुह + कः टाप् च।) कटुकी। इति रत्नमाला॥ (अस्याः पर्य्यायो यथा,—
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ अस्याः गुणाः कटुकाशब्दे ज्ञेयाः॥)

काण्डर्षिः, पुं, (काण्डस्य वेदविभागस्य ऋषिः। यद्वा काण्डेषु एकजातीयक्रियादिसमवायेषु ऋषिर्विचारकः।) वेदकाण्डविशेषाध्यायकमुनिभेदः। स तु जैमिन्यादिः। इति त्रिकाण्डशेषः॥ (जैमिनिस्तु पूर्ब्बमीमांसाशास्त्रप्रणयनेन क्रियाकाण्डस्य विचारकः। तथा वेदव्यासः उत्तरमीमांसाख्यवेदान्तशास्त्रप्रणयनेन ज्ञानकाण्डस्य विचारकः। इत्यादि सूरिभिर्निरुक्तम्॥)

काण्डवान्, [त्] त्रि, (काण्डः शरःप्रहरणतया अस्यास्ति इति। काण्ड + मतुप्। मस्य वः।) काण्डीरः। इत्यमरः। २। ८। ६९॥ तीरान्दाज इति भाषा॥

काण्डसन्धिः, पुं, (काण्डस्य स्कन्धस्य सन्धिः मेलनस्थानम्।) ग्रन्थिः। इति राजनिर्घण्टः॥ पाव् गाँट इति च भाषा॥

काण्डस्पृष्टः, त्रि, (स्पृष्टं गृहीतं काण्डं येन निष्ठान्तत्वात् परनिपातः।) काण्डपृष्ठः। शस्त्राजीवी। इत्यमरः। २। ८। ६७॥

काण्डहीनं, क्ली, (काण्डेन स्कन्धेन हीनम्।) भद्रमुस्तकम्। इति शब्दचन्द्रिका॥

काण्डिका, स्त्री, (काण्डः गुच्छः प्राशस्त्येन अस्ति अस्याः। काण्ड + ठन् + टाप्।) लङ्कानामकधान्यविशेषः। वालुकीनामकर्कटीभेदः। इति राजनिर्घण्टः॥

काण्डीरः, त्रि, (काण्डः वाणः अस्त्यस्य। काण्ड + "काण्डाण्डादीरन्नीरचौ"। ५। २। १११। इति ईरन्।) काण्डास्त्रवान्। इत्यमरः। २। ८। ६९॥ तीरान्दाज इति भाषा॥ (यथा भट्टिः ४। १०।
"काण्डीरः खाड्गिकः शार्ङ्गी रक्षन् विप्रस्तनुत्रवान्"॥)

काण्डीरः, पुं, (काण्डः स्तम्बः अस्यास्तीति। काण्ड + "काण्डाण्डादीरन्नीरचौ"। ५। २। १११। इति ईरन्।) अपामार्गवृक्षः। लताप्रभेदः। काण्डवेल इति ख्यातः। तत्पर्य्यायः। काण्डकटुकः २ नासासंवेदनः ३ पटुः ४ अग्रकाण्डः ५ स्तोमवल्ली ६ कारवल्ली ७ सुकाण्डिका ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। सारकत्वम्। दुष्टव्रणलूतागुल्मोदरप्लीहशूलमन्दाग्निनाशित्वञ्च। इति राजनिर्घण्टः॥

काण्डीरी, स्त्री, (काण्डीर + गौरादित्वात् ङीष्।) मञ्जिष्ठा। इति रत्नमाला॥ काण्डीरा इत्यपि पाठः॥ (मञ्जिष्ठाशब्देऽस्या गुणादयो ज्ञातव्याः॥)

काण्डेक्षुः, पुं, (काण्डे इक्षुरिव।) कोकिलाक्षवृक्षः। इत्यमरः। २। ४। १०४॥ कुलिया खाड़ा इति भाषा॥ (अस्य पर्य्यायाः। यथा, भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥
"कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः।
भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुवालिका"॥
गुणाऽस्य क्षुरकशब्दे ज्ञेयाः॥) काशतृणम्। इति राजनिर्घण्टः॥

काण्डेरी, स्त्री, (काण्डं वाणाकारं पुष्पं ईर्त्ते। काण्ड + ईरङ् गतौ + अण्। गौरादेराकृतिगणत्वात् ङीष्।) नागदन्तीवृक्षः। इति रत्नमाला॥

काण्डेरुहा, स्त्री, (काण्डे रोहति इति कः टाप्। सप्तम्या अलुक्।) कटुकी। इति रत्नमाला॥ (कटुकीशब्देऽस्या विशेषो बोध्यः॥)

कातरः, त्रि, (कु कष्टेन तरतीति। कु + तॄ + अच्। कोः कादेशः।) व्यसनाकुलचित्तः। व्याकुलः। तत्पर्य्यायः। अधीरः २। इत्यमरः। ३। १। २६॥ (यथा रघुः ११। ७८।
"कातरोऽसि यदि वोद्गतार्च्चिषा
तर्ज्जितः परशुधारया मम"॥)

कातरः, पुं, (कं जलं आतरति। क + आ + तॄ + अच्।) कातलमत्स्यः। इति शब्दरत्नावली॥

कातलः, पुं, (कातर एव रस्य लः। अयं हि रोहितादिवत् न तेजस्वी अतोऽस्य तथात्वम्। यद्वा, कस्य जलस्य तलं स्पृश्यत्वेन न अस्ति अस्य। अर्श आदित्वादच्।) मत्स्यविशेषः। कात्ला इति भाषा। तस्य गुणाः। उष्णत्वम्। मधुरत्वम्। गुरुपाकित्वम्। त्रिदोषकारित्वञ्च। इति राजवल्लभः॥ (यथा, वैद्यके।
"कातलो मधुरस्तोष्णो गुरुपाकी त्रिदोषकृत्"॥)

कातृणं, क्ली, (कुत्सितं तृणं क्षुद्रं तृणं वा। कोः कादेशः।) रोहिषतृणम्। इति राजनिर्घण्टः॥

कात्यः, पुं, (कतस्य ऋषेर्गोत्रापत्यं। कत + "गर्गादिभ्यो यञ्"।४।१।१०५। इति यञ्।) कात्यायनमुनिः। इति त्रिकाण्डशेषः॥

कात्यायनः, पुं, (कतस्य गोत्रापत्यम्। गर्गादित्वात् यञ् यञन्तत्वात् यनिष्फः।) धर्म्मशास्त्रकर्त्तृमुनिविशेषः। (यथोक्तं याज्ञवल्क्ये १। ४। ५।
"मन्वत्रि विष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसम्बर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगोतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः"॥
वररुचिः। इति मेदिनी॥

कात्यायनी, स्त्री, (कतस्यापत्यं स्त्री। "गर्गादिभ्यो यञ्"। ४। १। १०५। इति यञ्। "सर्व्वत्रलोहितादिकतन्तेभ्यः"। ४। १। १८। इति ष्फः। षित्वात् ङीष्।) दुर्गा। (यथा मार्कण्डेय ९१। २३।
"एतत्ते वदनं सौम्यं लोचनत्रयभूषितम्।
पातु नः सर्व्वभूतेभ्यः कात्यायनि नमोऽस्तु ते"॥)
अर्द्धवृद्धा काषायवसना विधवा। इत्यमरः। २। ६। १७॥ (याज्ञवल्क्यमुनेः पत्न्योरेका पत्नी। यदुक्तं बृहदारण्यकोपनिषदि। "याज्ञवल्क्यस्य द्वे भार्य्ये बभूवतुः मैत्रेयी कात्यायनी च। तयोर्हि मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायनी"॥ पत्न्यां ङीष्। कात्यायनस्य ऋषेः पत्नी"॥)

कादम्बः, पुं, (कदम्बे समूहे भवः। कदम्ब + अण्।) कलहंसः। वालि हाँस् इति भाषा। इत्यमरः। २। ५। २३। (यथा रघुः। १३। ५५।
"क्वचित् खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पङ्क्तिः"॥)
अस्य मांसस्य गुणाः। वायुरक्तपित्तनाशित्वम्। भेदकत्वम्। शुक्रकारित्वम्। शीतत्वञ्च। इति राजवल्लभः॥ (कदम्ब एव। स्वार्थे अण्।) कदम्बवृक्षः। इत्यमरटीकायां भरतः॥ (कदम्बस्येदमिति व्युत्पत्त्या अण्। कदम्बसम्बन्धिनि, त्रि। कदम्बकुसुमम्। यथा रघुः १३। २७।
"गन्धश्च धाराहतपल्वलानां
कादम्बमर्द्धोद्गतकेसरञ्च"॥)
वाणः। इति मेदिनी॥

कादम्बकः, पुं, (कादम्ब + स्वार्थे कन्।) वाणः। इति हारावली॥

कादम्बरं, क्ली, (कादम्बम् कदम्बोद्भवं रसं लाति गृह्णातीति। कादम्ब + ला + कः। लस्य रः।) कदम्बपुष्पोद्भवमद्यम्। इति मेदिनी॥
(यथा, माघे।
"निषेव्य मधुमाधवाः सरसमत्र कादम्बरम्"॥)
दधिसारः। इति हेमचन्द्रः॥ शीधुः। इति विश्वः॥
(इक्षुजातगुड़ादि। इति मल्लिनाथः॥)

कादम्बरः, पुं, (कादम्बं कदम्बरसवत् लाति गृह्णातीति। ला + कः। लस्य रश्च।) दध्यग्रम्। दधिसरः। इति मेदिनी॥

कादम्बरी, स्त्री, (कु ईषत्कृष्णवर्णं नीलवर्णमित्यर्थः अम्बरं वस्त्रं यस्य। कोः कदादेशः। कदम्बरो बलरामस्तस्य प्रिया। कदम्बर + अण् ततः स्त्रियां ङीप्। यद्वा कदम्बे जातो रसः कादम्बः। "तत्रजातः"। ४। ३। २५। इत्यण्। कादम्बं राति ददातीति। रादाने + "आतोऽनुपसर्गे कः"। ३। २।३। इति कः। गौरादित्वात् ङीष्।) मदिरा। इति मेदिनी॥ (यथा,—
"कादम्बरीमदविघूर्णितलोचनस्य
युक्तं हि लाङ्गलभृतः पतनं पृथिव्याम्"॥
इत्युद्भटः॥) कोकिला। सरस्वती। शारिकापक्षिणी। इति मेदिनी॥ (वाणभट्टविरचितकाव्यविशेषः। स्वनायिकानाम्नैव प्रसिद्धोऽयं ग्रन्थः। इयं कादम्बरी तु वाणभट्टेनासमापिता पुनरस्य पुत्त्रेण समाप्तिं नीता॥ नायिकाविशेषः। सा तु तुम्बुरुप्रभृतीनां चतसॄणां गन्धर्व्वाणां ज्येष्ठस्य हंस इत्याख्यया प्रसिद्धस्य गन्धर्व्वस्य कन्या। अस्या जननी सोममयूखसम्भवाप्सरसां कुले जाता गौरीति नाम्ना प्रसिद्धा। अस्या अन्यद्विवरणन्तु कादम्बर्य्यां द्रष्टव्यम्॥)

कादम्बरीवीजं, क्ली, (कादम्बर्य्याः वीजं आसवः।) सुरावीजम्। इति रत्नमाला॥

कादम्बर्य्यः, पुं, (कादम्बर्य्यै हितः इति यत्।) कदम्बवृक्षः। इति जटाधरः॥

कादम्बा, स्त्री, (कादम्ब इव आचरति। कादम्ब + आचारे क्विप् + अच् + टाप्।) कदम्बपुष्पीवृक्षः।